# यमकृतं पुरुषोत्तम स्तोत्रं

अथ श्रीपुरुषोत्तम स्तोत्रं यम उवाच
नमस्ते भगवन् देव लोकनाथ जगत्पते |
क्षीरोदवासिनं देवं शेषभोगानुशायिनं || १||
वरं वरेण्यं वरदं कर्तारमकृतं प्रभुं ।
विश्वेश्वरमजं विष्णुं सर्वज्ञमपराजितं || २||
नीलोत्पलदलश्यामं पुंडरीकनिधे क्षणं |
सर्वज्ञं निर्गुणं शांतं जगद्धातारमव्ययं ॥ ३।
सर्वलोकविधातारं
सर्वलोकसुखावहं ।
पुराणं पुरुषं वेद्यं व्यक्ताव्यक्तं सनातनं || ४||
परावराणां सृष्टारं लोकनाथं जगद्गुरुं |
श्रीवरस्कसंयुक्तं वनमालादिभूषितं || ५||
पीतवस्त्रं चतुर्बाहुं शंखचक्रगदाधरं |
हारकेयूरसंयुक्तं
मुकुटांगदधारिणं || ६||
सर्वलक्षणसंपूर्णं
सर्वेंद्रियविवर्जितं ।
कूटस्थमचलं सूक्ष्म
ज्योति रूपं सनातनं || ७||
भावाभाव विनिर्मुक्तं व्यापिनं प्रकृतेः परं ।
नमस्यामि जगन्नाथं ईश्वरं सुखदं प्रभुं || ८||
इत्येवं धर्मराजस्तु पुरा न्यगोध सन्निरौ |
स्तुत्वा नानाविधेः स्तोत्रै
प्रणाममकरोत्तदा || ९ ||
|| इति श्री ब्रह्ममहापुराणी यमकृतं पुरुषोत्तम स्तोत्रं ||